# Shri Shachinandanavijayashtakam

# શ્રીશચીનન્દનવિજયાષ્ટકમ્

## Document Information

Text title : shachInandanavijayAShTakam

File name : shachInandanavijayAShTakam.itx

Category : deities_misc, gurudev, aShTaka, vishvanAthachakravartina, stavAmRRitalaharI

Location : doc_deities_misc

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 25, 2021

*sanskritdocuments.org*

# શ્રીશચીનન્દનવિજયાષ્ટકમ્

ગદાધર યદા પરઃ સ કિલ કશ્ચનાલોકિતો
    મયા શ્રિતગયાધ્વના મધુરમૂર્તિરેકસ્તદા ।
નવામ્બુદ ઇવ બ્રુવન્ ધૃતનવામ્બુદો નેત્રયો-
    ર્લુઠન્ ભુવિ નિરુદ્ધવાગ્વિજયતે શચીનન્દનઃ ॥ ૧॥

અલક્ષિતચરીં હરીત્યુદિતમાત્રતઃ કિં દશાં
    અસાવતિબુધાગ્રણીરતુલકમ્પસમ્પાદિકામ્ ।
વ્રજન્નહહ મોદતે ન પુનરત્ર શાસ્ત્રેષ્વિતિ
    સ્વશિષ્યગણવેષ્ટિતો વિજયતે શચીનન્દનઃ ॥ ૨॥

હા હા કિમિદમુચ્યતે પઠ પઠાત્ર કૃષ્ણં મુહુ-
    ર્વિના તમિહ સાધુતાં દધતિ કિં બુધા ધાતવઃ ।
પ્રસિદ્ધ ઇહ વર્ણસઙ્ઘટિતસમ્યગામ્નાયકઃ
    સ્વનામ્નિ યદિતિ બ્રુવન્વિજયતે શચીનન્દનઃ ॥ ૩॥

નવામ્બુજદલે યદીક્ષણસવર્ણતાદીર્ઘતે
    સદા સ્વહૃદિ ભાવ્યતાં સપદિ સાધ્યતાં તત્પદમ્ ।
સ પાઠયતિ વિસ્મિતાન્ સ્મિતમુખઃ સ્વશિષ્યાનિતિ
    પ્રતિપ્રકરણં પ્રભુર્વિજયતે શચીનન્દનઃ ॥ ૪॥

ક્વ યાનિ કરવાણિ કિં ક્વ નુ મયા હરિર્લભ્યતાં
    તમુદ્દિશતુ કઃ સખે કથય કઃ પ્રપદ્યેત મામ્ ।
ઇતિ દ્રવતિ ઘૂર્ણતે કલિતભક્તકણ્ઠઃ શુચા
    સ મૂર્ચ્છયતિ માતરં વિજયતે શચીનન્દનઃ ॥ ૫॥

સ્મરાર્બુદદુરાપયા તનુરુચિચ્છટાચ્છાયયા
    તમઃ કલિતમઃકૃતં નિખિલમેવ નિર્મૂલયન્ ।
નૃણાં નયનસૌભગં દિવિષદાં મુખૈસ્તારયન્
    લસન્નધિધરઃ પ્રભુર્વિજયતે શચીનન્દનઃ ॥ ૬॥

અયં કનકભૂધરઃ પ્રણયરત્નમુચ્ચૈઃ કિરન્
    કૃપાતુરતયા વ્રજન્નભવદત્ર વિશ્વમ્ભરઃ ।
યદક્ષિ પથસઞ્ચરત્સુરધુનીપ્રવાહૈર્નિજં
    પરં ચ જગદાર્દ્રયન્વિજયતે શચીનન્દનઃ ॥ ૭॥

ગતોઽસ્મિ મધુરાં મમ પ્રિયતમા વિશાખા સખી
    ગતા નુ બત કિં દશાં વદ કથં નુ વેદાનિ તામ્ ।
ઇતીવ સ નિજેચ્છયા વ્રજપતેઃ સુતઃ પ્રાપિત-
    સ્તદીયરસચર્વણાં વિજયતે શચીનન્દનઃ ॥ ૮॥

ઇદં પઠતિ યોઽષ્ટકં ગુણનિધે શચીનન્દન
    પ્રભો તવ પદામ્બુજે સ્ફુરદમન્દવિશ્રમ્ભવાન્ ।
તમુજ્જ્વલમતિં નિજપ્રણયરૂપવર્ગાનુગં
    વિધાય નિજધામનિ દ્રુતમુરીકુરુષ્વ સ્વયમ્ ॥ ૯॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિઠક્કુરવિરચિતસ્તવામૃતલહર્યાં
        શ્રીશચીનન્દનવિજયાષ્ટકં સમ્પૂર્ણમ્ ।

*Shri Shachinandanavijayashtakam*

pdf was typeset on November 25, 2021

Please send corrections to *sanskrit@cheerful.com*